१०८०
No. क
Title कामाख्या तन्त्रम्
Author
Extent २८ पत्र Age
Subject तन्त्र

॥ श्री ॥

कामकलातन्त्रम्

नं० १०८०

मे १८८० - क

कामरूपा तन्त्रम्

१८ पत्राणि

तन्त्रम्

कामाख्यातंत्रम्



कामा॰
तं॰
१

ॐनमःपरमदेवतायै श्रीदेव्युवाच भगवन्सर्वधर्मज्ञसर्व
विद्याप्रियप्रभो सर्वदानंदहृदयसर्वागमप्रकाशक सुभा
णि सर्वतंत्राणि साधनानि च भूरिशः विद्यास्ताः सकलादेव
फलानित्वत्प्रसादतः सारात्सारतरंमंत्रंज्ञानासि किंवदप्रभो
श्रुतीवेदंरहस्यानंतेनाहंश्रवणोद्यता श्रीशिवउवाच शृणु
देविसुदाभद्रेमदीयेप्राणवल्लभे योनिरूपामहाविद्याकामा
ख्यावरदायिनी वरदानंददानित्यामहाविभववर्द्धिनी सर्वे।
षांजननीसापिसर्वेषांतारिणीमता रमणीचैवसर्वेषांस्थू
लासूक्ष्मासदाशुभा तस्यास्तंत्रंप्रवक्ष्यामिसावधानावधारय
निखिलास्तवविद्यास्तुयेयेसिध्यंतिसाधकाः यत्रकुत्रापिके
नापिकामाख्याफलदायिनी कामाख्याविमुखालोकानिंदि
ताभुवनत्रये विनाकामात्मिकांकापिनदात्रीसिद्धिसंपदां
कामाख्याचसदाधर्मःकामाख्याचार्थएवच कामाख्याकाम
संपत्तिःकामाख्यामोक्षएवच निर्वाणंसर्वदेवेशिसैवसायुज्य
मीरितं सालोकंसहरूपंचकामाख्यापरमागतिः शिवत्वात्र
ह्मतादेविविष्णुत्वंब्रह्मतापिच देवत्वंसर्वदेवानांनिश्चितंकाम
रूपिणी सर्वासामपिविद्यानांलौकिकंवाकामेवच कामाख्या
यामहारेखाःस्वरूपंसर्वमेवहि पश्यपश्यप्रियेसर्वंचिंतयि

त्वाहदिसर्वं कामाख्यांचविनाकिंचिद्दृश्यतेभुवनेषुच ल
क्षकोटिमहाविद्यास्तेजारैपरिकीर्तिताः सारात्साररतमादेवी
सर्वेषांषोडशीमता तस्यापिकारणंदेविकामाख्याजगदंबि
का चंद्रकांतिर्यथादेविजायतेलीयतेपुनः स्थावराणिच
राणीह्निमानित्यानियानिच सर्वेसर्वंपुनःसर्वेविनातां
नैवजायते इतिकामाख्यातंत्रेदेवीश्वरसंवादेप्रथमःपटलः १
श्रीशिवउवाच मंत्रोद्धारंप्रवक्ष्यामिशृणुदेविपरात्परं यज्ज्ञा
त्वासाधयेत्सिद्धिंदेवानामपिदुर्लभं मंत्रस्तस्यप्रभावेनमो
हयेदखिलंजगत् ब्रह्मादीन्मोहयेद्देविबालकोजननींय।
था देवदानवगंधर्वकिन्नरादीन्सुरेश्वरि मोहयेत्क्षणमात्रे।
ण प्रजास्तस्यतिर्यथा मंत्रस्यपुरतोदेविराजानःसचिवादयः
अन्येचमानवाःसर्वेमेषादिजंतवोयथा मोहयेन्नगरंराज्ञः
सहस्रप्रचरथ्यादिकं उर्वशाद्याश्चसर्वेषांराजपत्न्यादिकान्न
णात् स्तंभनंमारणंदेविक्षोभणंजृंभणंतथा द्रावणंभीष
णंचैवविद्वेषोच्चाटनेतथा आकर्षणंचनारीणांविशेषेण।
महेश्वरि वशीकरणमन्यानिसाधयेत्साधकोत्तमः अग्निःस्तं
भतिवायुश्चसूर्योवारिसमूहकः करोत्येवसर्वाणिसाधक
स्यनचान्यथा जगज्जयतिमंत्रज्ञःकामदेवोयथाजयी तस्या

साध्यंत्रिभुवनेनकिंचित्प्राणवल्लभे जृंभणंतेनत्कृपांशाया
शाववर्णरोहकं अंगवर्णयुतंदेविनादविंदुयुतंपुनः पंचत्व
त्रिगुणीकृत्यकल्पवृत्तमंत्रंजपेत् एकंवापिद्वयंवापिचतु
र्थंवाजपेत्सुधीः कामाख्यासाधनेकार्यंसर्वविघ्नस्साधकैः
अन्यथासिद्धिहानिःस्याद्विघ्नस्तेषांपदेपदे किंशाक्तावैष्णवाः
किंवाकिंशैवागणपत्यकाः महामायावृताःसर्वेतैलयंत्रेवृषा
इव अस्यास्साधनेदेविशाक्तानामेवसुंदरि नात्रचक्रविशुद्धि
स्तुकालादिशोधनेनच कृतेचनरकंयान्तिसर्वेतस्यविनश्यप।
ति क्लेशश्चमंपरंदेविसाधनेद्भुतपोषकं श्रीदेव्युवाच काली
तारामंत्राणांचक्रचिंतांकरोतियः कागतिस्तस्यदेवेशिनि
स्तारोविद्यतेनवा श्रीशिवउवाच वयमग्निस्थकालोपियेयेया
तामहेश्वरि किंवमोदेवदेवेशिकालिकातारिणीमंत्रं श्रुत्वा
नाद्यदिवामोहाकालीतारामनोप्रिये कृतेचक्रादिगणनेश्र
नीविशाकर्मिभवेत् कल्पांतेचमहादेविनिस्तारोविद्यतेनच
अस्याः एतांप्रवक्ष्यामित्रैलोक्यसाधनप्रदां दृढाद्दृढाश्चदेवे।
शियायासिद्धिस्संजायतेप्राप्यतेतत्क्षणेनैवनात्रकार्याविचा
रणा सिंहासनमंडलंकृत्वात्रिकोणंचसमालिखेत् निजबीजानि
तन्मध्येयोजयेत्साधकोत्तमः चतुरस्रंलिखेद्देवितनोवज्राष्टकं

प्रिये अष्टदिक्षु यजेत्तां तन्न्यासजालं विधाय च अस्तोभस्य
ऋषिः प्रोक्तश्छंदो त्रिष्टुबुदाहृतं कामाख्या देवता सर्वसिद्ध
ये विनियोगिता करांगन्यासकं चैव निजबीजेन कारयेत्
षड्दीर्घभाजा ध्यायेत्तु कामाख्यामिष्टदायिनीं रक्तवस्त्राव
गुंठितां सिंदूरतिलकान्वितां निष्कलंकां सुधाधामवदना
मलकोज्वलां स्वर्णादिमणिमाणिक्यभूषणैर्भूषितां परां
नानारत्नादिनिर्माणसिंहासनोपरिस्थितां हास्यवक्त्रां प
द्मरागमणिकांतिमत्तनुमां पीनोन्नतकुचां कृशां श्रुतिभू
लग्नेक्षणान् करात्तैश्च महासंपद्दायिनीं परमेश्वरीं स
र्वांगानिंदितां नानाविद्याभिः परिवेष्टितां डाकिनीयोगि
नीविद्याधरीभिः परिशोभितां कामिनीभिर्युतां नानागं।
धाद्यैः परिरंजितां तांबूलादिकाभ्यस्तनायिकाभिर्वंदि
तां समस्तसिद्धवर्गाणां प्रणतानां प्रतीक्षणां त्रिनेत्रां
मोहनकरीं पुष्पचापेषुविभ्रतीं भगलिंगसमाख्याने कि
न्नरीभ्योपि शृण्वतीं वाणीलक्ष्मीमुखावाक्यप्रतिवाक्यस
न्मुखां अशेषगुणसंपन्नां करुणासागरां शिवां अथवा
हृयेत्ततो देवीमेवं ध्यात्वा च साधकः एतयैतया यथोक्तेन।
विधानेन ह्यत्प्रिये कुंकुमाद्यै रक्तपुष्पैः सुगंधिकुसुमैस्तथा

कामा. जवयावकसिंदूरैः करवीरैर्विशेषतः करवीरैश्च देवेशि का
तं. माख्यानिश्चितिस्त्वयं जवायांचतथादेविहिमालसादिसमीप
३ के करवीरस्यमाहात्म्यंकथितंनैवशक्यते प्रदानात्तुजवा
याश्चगाणपत्यमवाप्नुयात् पूजयेद्देविकांदेविपंचतत्त्वेन
देव्यास्तत्प्रसादोजायतेतत्क्षणात् पंचमेनमहादेविशिवोभ
तिसाधकः पंचतत्त्वसमंनास्तिनास्तिनास्तिकलौयुगे
पंचतत्त्वंपरंब्रह्म पंचतत्त्वंभुक्तिमुक्तिदंमहायोगःप्रकीर्ति
ताः पंचतत्त्वेनदेवेशिमहापातककोटयः नश्यंतितत्क्षणे
नैवतूलराशिमिवानलः यत्रैवपंचतत्त्वानितत्रदेवीवसे
द्ध्रुवं पंचतत्त्वविहीनेनतुविमुखीजगदंबिका मद्येनमोद
दनेस्वर्गेमांसेनमानवाधिपः मत्स्येनभैरवीपुत्रोमुद्रया
साधुतांव्रजेत् पंचमेनमहादेविसायुज्यंलभतेनरः भक्ति
युक्तोभजेद्देवींतदासर्वंप्रजायते स्वयंभूकुसुमैःपुष्पैः
कुंडगोलाद्भवैःशुभैः कुंकुमाद्यैर्गंधसवैर्नवाद्यैर्देव्यैनिवेद
येत् नानोपहारनैवेद्यैरन्नादिपायसैरपि वस्त्रभूषादि
भिर्देविप्रपूज्यावरणंयजेत् इंद्रादीन्पूजयेत्तत्रतेषांसं
ज्ञाणिशंकरि पार्श्वयोःकमलावाण्यौपूजयेत्साधकोत्तमः
प्रत्नदायत्नदाचैवमतदाजयदातथा रमदामोहदादेविश्र

द्धिदा सिद्धिदापि च ऋद्धिदा शुद्धिदा चैव भक्तिदा मुक्तिदा
तथा मोक्षदा सुखदा चैव ज्ञानदा कांतिदा तथा एताष्टौ:
महादेव्याः सर्वदा यंत्रमध्यगाः शक्त्याद्यास्तथाष्टाः सि
द्धये यत्नतः शिवे षडंगानि ततो देव्याः यजेत्पुष्पांजली
न्क्षिपेत् यथाशक्ति जपेन्मंत्रं शुद्धभावेन साधकः जपं स
मर्प्य वा घाघे स्तोषयेत्स्वदेवतां पठेत्स्तोत्रं च कवचं प्रण
मेद्विधिनामुना ततश्च हृदये देवीं संयुज्य शेषकां प्रति
निर्माल्यं निक्षिपेद्देशे त्रिकोणं परिकल्पयेत् निर्माल्यं सा
धकैः सार्द्धं शक्तीयाद्भक्तिभावतः विहरेत्तं च तत्त्वेन यथा
विधि स्वशक्तितः शक्तिमूलं साधनं च शक्तिमूलं जपा।
दिकं शक्तिमूला जपाद्यैव शक्तिमूलं च जीवनं ऐहिकं श
क्तिमूलं च परत्र शक्तिमूलकं शक्तिमूलं तपः सर्वं चतुर्वर्ग
स्तथा प्रिये शक्तिमूलानि सर्वाणि स्थावराणि चराणि च
शक्ता वा पापिनो देवि रौरवं यान्ति निश्चितं तस्मात्सर्वप्रय।
त्नेन साधकैश्च शिवात्तया शक्त्युच्छिष्टं पीयते हि नान्यथा
यान्ति रौरवं शक्तैर्यद्दीयते देवि तत्तद्देवार्पितं भवेत् तत्कर्म
सर्वं सफलं सत्यं सत्यं कुलेश्वरि शक्तिं विना कलौ चक्रं करो
ति कारयेदपि स यानि नरकं घोरं निस्तारो न हि विद्यते एवं

कामा० तं० ४

तत्पूजयेद्देवींयंयंचोद्दिश्यसाधकः तंतंकामंकरेकृत्वा
प्रियेजयतिनिश्चितं पुरश्चरणकालेतुलक्षमेकंजपेत्सु
धीः तद्दशांशंहवनेदद्यात्शर्कराम्बुपायसैः तर्पयेत्तुत
द्विभागैर्जलैश्चंदनमिश्रितैः गंधाद्यैःसाधकाधीशस्तद्द
शैरभिषेचयेत् अभिषेकदशांशेनभोजयेच्चद्विजोत्तमान्
मिष्टान्नैःसाधकान्देवि देवीभक्तांश्चपंचमैः एवंपुरस्क्रि
यांकृत्वासिद्धोभवतिसज्जनः प्रयोगेषुततोदेवियोग्योभ
वतिनिश्चितं एतत्पूजादिकंसर्वंकामाख्याप्रीतिकारकं
महाप्रीतिकरीपूजायोनिचक्रेकुलेश्वरि योनिपूजामहा
पूजातत्समानहिसिद्धिदा तत्रदेवींयजेद्धीमान्सैवदेवीन
चान्यथा आवाहनादिकर्माणिनतत्रसर्वथाप्रिये लेपये
त्तांतुगंधाद्यैःपूजयेद्विधिनैवच महाप्रीतिर्भवेद्देव्याःसि
द्धोभवतितत्क्षणात् योनिपूजासमापूजानास्तितन्त्रेत्व
मामके चुंबनाल्लेहनाद्योनौकल्पंतुचमतिक्रमेत् दर्श
नात्साधकाधीशः स्पर्शनात्सर्वमोहनः लिंगयोनिसमा
ख्यानंकामाख्याप्रीतिवर्द्धनं तदेवजीवनंतस्यागिरिजे
वहुकिंवचः तस्मात्सर्वप्रयत्नेनयोनिपूजांसमाचरेत्
परस्त्रीयोनिमासाद्यविशेषेणयजेत्सुधीः वेश्यायोनिपरा

देवि साधनं तत्र कारयेत् त्रिरात्रं देवसिध्यंति नात्र कार्या विचा
रणा स्वतन्त्रकेलनामध्ये साधयेद्धि थिवन्मुदा अविरात्सि
द्धिमाप्नोति देवानामपि दुर्लभां सारात्सारतमं देवि योनि।
साधनमीरितं विना तत्साधनं देवि महाशापः प्रजायते
योनिनिंदां च गुणं देवि यः करोति नराधमः अचिरात्रौरवं याति
देवि सत्यं शिवाज्ञया योनिमध्ये वसेद्देवि योगिन्यः किंकराः स्थिताः
तस्मान्न निंदयेद्योनिं यदीच्छेदात्मनो हितं योनिनिंदाप्रकुर्वाणः
सर्वं शेन विनश्यति योनिस्तुतिपरो देवि शिवः स्यात्तत्क्षणेन च
किं ब्रूमो योनिमाहात्म्यं योनिपूजाफलानि च वेदवक्त्राद्दितं किं
वित्तं स्यात् कामरूपिणी इति श्रीकामाख्यातंत्रे देवीश्वरसंवादे द्वि।
तीयः पटलः २ श्रीमहादेव उवाच अथ मंत्रं प्रवक्ष्यामि सादरं श्रृणु।
पार्वति यस्य प्रसादमात्रेण ब्रह्मविष्णुशिवा अपि इंद्राद्याः देव
ताः सर्वा भवंति कामनायुताः गंधर्वाः किंनरा देवि नगा विद्याध
रादयः यत्प्रसादं समागम्य स्वकीयविषयान्विताः योगिनी डाकि
नी विद्या भैरवी नायिकादिकाः कामाख्यामंत्रमासाद्य भजंति यो
गिनां परं स्वर्गे मर्त्ये च पाताले ये ये सिध्यंति साधकाः निजबीज
त्रयं देवि क्रोधद्वयमतः परं वधूबीजत्रयं चैव कामाख्यां वदन
वदेत् प्रसीदेति पदं चैव सर्वबीजानि कल्पयेत् ठद्वयांतेमन्त्रः

का.मा.
तं.
५

श्रोक्तः सर्वतंत्रेषु दुर्लभः श्रृणु चाद्य महादेवि त्रैलोक्ये चातिदुर्ल
भः चतुर्वर्गप्रदा साक्षान्महापातकनाशिनी स्मरणादेव मंत्रस्य
सर्वे विघ्नाः समाकुलाः नश्यंति दहने दीप्ते पतंगा इव पार्वति
मंत्रग्रहणमात्रेण जीवन्मुक्तो भवेन्नरः भुक्तिमुक्तिः करे तस्य स
र्वेषां प्रियतां व्रजेत् आकृष्टा निश्चयं लक्ष्मीर्वदने गीः सदा वसेत्
पुत्राः पौत्राः प्रपौत्राश्च भवंति चिरजीवनः श्रियो वा सर्वपीठेषु का
माख्यादिषु शंकरि लिपिस्थलनितत्सैव नात्र कार्या विचारणा
तस्य नाम च संस्मृत्य प्रणमंति सभाजनाः नाम श्रुत्वा वारमेकं प
लायंते च हिंसकाः यावंतः सिद्धयः संति स्वर्गे मर्त्ये रसातले सा
धकानां परिवर्त्याऽऽवेंति नात्र संशयः तेहृष्ट्वासाधकेंद्रं च वादे
स्खलति दर्शनात् सभायां कोटिसूर्याभं पश्यंति सर्वसज्जनाः जि
ह्वाकोटिसहस्रैस्तु वक्त्रकोटिशतैरपि वर्णितुं नैव शक्नोमि मंत्र
मेतन्महेश्वरि न्यासध्यानादिकं सर्वं एवं मूलं च वरानने पुरश्चर्या वि
धौ किं तु षट्सहस्रं मंत्रं जपेत् यथाविधि षट्शतानि होमादी
न्समाचरेत् सिद्धो भवति मंत्रज्ञः प्रयोगेषु ततः क्षमः ध्यानं शृ
णु महादेव्या यन्यथाम्बुसनश्चंद्रारिसूहनने देवि क्षणेनैव च वध्या।
नष्टा प्रतिमल्ललितवेशं हास्यवक्त्रां त्रिनेत्रां जितजलदसकांतिं
पट्टवस्त्रप्रकाशां अभयवरकरां फालरत्नप्रभातिभव्यां स्मरतरुतल

पीठेरत्नसिंहासनस्थां हरिहरविधिविंधोद्भदिहृद्दिस्वरूपांमद
नशरसमाक्रांकामिनीकामदात्री निखिलजनविलासोल्लासस्व
रूपांभवानीं कलिकलुषनिहंत्रीं योनिरूपांभजामि गुह्याद्गुह्यतरं
देवीध्यानंदारिद्र्यनाशकं गोपितंसर्वतंत्रेषुतवभावात्प्रकाशितं
स्वयंभूकुसुमैनैवतिलकंपरिकल्पयेत् तूलिकायांमहादेविकुल
शक्तिंसमाविशेत् करवीरतपुत्वेःस्वाडसाधकस्तुंवयेन्मुदा तस्याथ
रोपयाश्चंगोनीरजव्याकुलःप्रिये दंतत्ततिरिताभ्यांचपरमंतत्रकार
येत् आलिंगयेन्मदोन्मत्तःस्तरूकुचमर्दनं नखाघातैर्विलिखेच।
रमयेदितिपंडिताः पुनःपुनश्चुंबनंचयोनौकुर्यात्कलेश्वरि सुकृत
लंभयेद्वीरोयोनौलिंगंप्रवेशयेत् आघातैस्तोषयेत्तंतुसंधानमे
दतःप्रिये ततोलिंगेस्थितेयोनौआस्रोतस्याःप्रजपेच अष्टोत्तरश
तंमंत्रंजपेद्धोमादिकांतया दिनत्रयंमहावीरःप्रजपेद्ध्यानतत्परः
श्राप्यतेमानसेवस्त्रनात्रकार्याविचारणा अतःपुष्पकलतोदेविनिवे
शयेत्तूलिकोपरि करवीरप्रसूनंचतस्यालिंगोपरिन्यसेत् ततोसा
देवदेवेशिजपेच्चाष्टसहस्रकं दिनत्रयंततोदेव्याःप्रीतिःस्यादच
लाप्रिये यन्नेविंदतितत्सर्वेवलत्तत्संख्येनसंशयः आनंदंवर्द्धये।
त्रिंशसाधकस्यमहात्मनः अष्टोत्तरशतंयोनिंसंचुंव्यापस्पसज्जनः
पुनर्लिंगेस्थितेयोनौजपेच्चाष्टसहस्रकं कांतांपंचशतांविलेप्त

ध्यातेसर्ववेदास्सखो निर्मंतस्यमहेशानिनायिकासंगमोभवेत् दे
पपालतास्समानीयकुलचक्रंविधायच तस्यायोनौयजेद्देवीं लक्षं।
विनेनसाधकः भगलिंगसमाख्यानेस्वस्वरेणसमुच्चरेत् योनींवी
क्ष्यजपेन्मंत्रंसप्तरात्रमतंद्रितः प्रत्यहंसततंकृत्वासोपिसिद्धीश्वरः
कलौ प्राप्तांशुद्धांतिपनदत्तस्यदेविनसंशयः सद्गुरोःस्मरणंकृत्वा
योनेश्चसाधनंयदि तदासिद्धिमवाप्नोतिचान्यथाहास्यमेवहि २

6

तिश्रीकामाख्यातंत्रेदेवीश्वरसंवादेद्वितीयःपटलः २ श्रीदेव्युवाच
गुरुतत्वंमहादेवविशेषेणवदप्रभो दुर्लभागुरुतायातसंभवेन्मा
नुषेकथं तत्रैवसद्गुरुःकोवाश्रष्टःकोवावदप्रभो ह्रीकृष्णमहादे
वसंशयोमममहोत्कटं इतिदेव्यावचःश्रुत्वाप्रोवाचशंकरःप्रभुः शृ
णुसारतरंज्ञानंसारत्सर्वांहितकारणं गुरुःसदाशिवःप्रोक्तस्त्वादि
नाथःसउच्यते महाकायगुतोदेवःसच्चिदानंदविग्रहः सदातनः
परंब्रह्मस्वरूपश्चसिद्धिगुणाःप्रभुः तत्वमसा दान्महादेविशिवोहमजराम
रः अतएवगुरुर्नैवमनुजः किंतुकल्पना दीक्षायैसाधकानांचबुद्ध्वा
दीक्षाजनेयथा मंत्रदातासिरःपद्मेसंध्यानेकुरुतेगुरोः तद्ध्यानेशि
वशिरसिवोपदिष्टंनचान्यथा अतएवमहेशानिकुतोहिमानुषो
गुरुः मानुषेगुरुतांदेविकल्पनानतुतत्यजेत अखंडमंडलाकारंव्या
प्तंयेनचराचरं तत्पदंदर्शितंयेनतस्मैश्रीगुरवेनमः प्रसिद्धमितिय

दैवितमदंदर्शकोनरः अतएवनरेदेवि गुरुताकल्पनैवहि नत
स्वयंगुरुर्नाचमूर्खेनाचोभयोरपि अयंगुरुरितिज्ञानंशिष्योयंचख
लमेयदा दर्शकोपटलस्यैवनस्वयंमानुषोगुरुः मोहेनजायतेस
म्यमानुषेगुरुभावनात् यथाभोक्तरिभोज्यंहिस्वर्णादिपावकेणच
दीयतेतन्तथादेवितस्यैसर्वंसमर्पणं यदिवित्तंचतमात्रंभग्नवापिम
हेश्वरि तदात्मजेत्तन्नमात्रंमन्यपात्रेणतोषयेत् अतोहिमनुजेलब्धे
दुष्टेशिष्योपिसंत्यजेत् अमन्मतस्तलोकेयत्तत्रहृष्टःसदाशिवः राज
स्वंदीयतेराज्ञेप्रजाभिर्मंडलादिभिः यथातथैवतस्यैतशिष्यदानं।
समर्पणं अत्रैवग्राहकाहिंसामंडलाद्यास्तनायदि अन्यद्वारेणदात
व्यंतास्तान्संत्यज्यसर्वदा सर्वेषांभुवनेसत्यंज्ञानायगुरुसेवनं ज्ञा।
नान्मोक्षमवाप्नोतितस्माज्ज्ञानंपरात्परं अतोयोज्ञानदानेहिनक्षम
स्तंत्यजेद्गुरुं अज्ञाकांक्षीनिरत्नंवयथासंत्यजतेप्रिये ज्ञानत्रयंयदा
भातिसद्गुरुःशिवएवहि अज्ञानिनंवर्जयित्वाशरणंज्ञानिनोव्रजेत्
ज्ञानाद्धर्मोभवेन्नित्यंज्ञानादर्थोहिपार्वति ज्ञानात्काममवाप्नोतिज्ञा
नान्मोक्षोहिनिर्मलः ज्ञानेहिपरमेवस्तु ज्ञानात्सारतरंनहि ज्ञानाय
भजतेदेवंज्ञानेहितपसःफलं मधुलुब्धोयथाभृंगःपुष्पात्पुष्पान्तरं
व्रजेत् ज्ञानलुब्धस्तथाशिष्योगुरोर्गुर्वंतरंव्रजेत् गुरवोबहवःसंति
शिष्यवित्तापहारकाः दुर्लभःसद्गुरुर्देविशिष्यसंतापहारकः अज्ञान

का.मा.तं. ७

7

तिमिरं यस्य ज्ञानांजनशलाकया चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे
नमः इति मन्त्रात्साधकेंद्रो गुरुं तां कल्पयेत्सदा ज्ञानिन्मेव शिष्यभक्त्या
केवलं निश्चितं शिवे शांतो दांतः कुलीनश्च प्रशुद्धांतःकरणः सदा पंच
तत्त्वार्चको यस्तु स सद्गुरुः संप्रकीर्तितः सिद्धोसावितिविद्यानोवक्रभिः
शिष्यपालकः चमत्कारी दैवशक्त्या सद्गुरुः कथितः प्रिये श्रुतं नमन्त्र
नेवाकं वक्ति साधुमनोहरं तं तं मंत्रं समं वक्ति यः एव सद्गुरुरुत्तमः सदा
यः शिष्यबोधेन हिताय च समाकुलः निग्रहानुग्रहे शक्तः सद्गुरुर्गीय
ते बुधैः परमार्थे सदा दृष्टिः परमार्थप्रकीर्तितं गुरुपादांबुजे भक्ति
र्यस्यैव सद्गुरुः स्मृतः इत्यादिगुणसंपन्नं दृष्ट्वा देवि गुरुं व्रजेत् सत्का
लं मंत्रं गुरुं शिष्याणां नास्ति कालविचारणा केवलं शिष्यसंपत्तिर्ग्राहको वक्रु
भारकः अर्पितं यस्य सर्वं सो लोके निर्मोगुरुर्मतः कायेन मनसा वा।
वाशिष्यं भक्तियुक्तं यदि दृष्ट्वा गुरुर्मोदते नास्तितस्य न हस्तका मतः कर्म
णा गर्हितेनैव हंति शिष्यधनादिकं शिष्याहितैषणं लोकं वर्जयेत्तं
नराधमं महाविद्यां समादाय वीराचारं दशान्तिव सयातिनरकं घोरं
शिष्याधिपतितो ध्रुवं पशुभावस्थितो यो हि कालिकातारिणीमंत्रं द
दाचारं वरैश्चैव नरकान्न निवर्तते तस्मात्सद्गुरुरस्तमाः साधकः सर्वदा
प्रिये पशोः दीक्षा यमाश्रोक्ता वाक्यं र्वेगोविद्याति नौ यदि दैवात्पशोर्विद्यां
लभते शक्तिमान्नरः कौलात्कौलिकीं प्राप्य तन्मंत्रं पुनरालभेत् तथा

विद्याश्चमन्त्रास्साफलदाजननीसदा अनयाविश्वसतोदेवीजातस्तस्मै
वसद्गतिः एवोक्तदोषयुक्तश्चदिव्योवावीरएववा तयोरपिनकर्तव्या
शिष्येणगुरुभावना किंतुभाव्यंहितैषित्वं गुरुतानकल्पनीयातेन
दिव्येवीरवरेवापिनदोषोऽस्तिशिवाज्ञया श्रीदेव्युवाच दिव्यतोवीरतो
देवपशुतःकिंविशेषतः वदस्वपरमेशानश्रोतुंमेचित्तमुत्सुकं श्री
शिवउवाच शृणुदेविजगद्वंद्येयत्पृष्टंतत्वमुत्तमं दिव्यःसर्वमनोहा
रीमितवादीस्थिरासनः गंभीरःश्लिष्टवक्ताचपातावधानकःसुखी
गुरुपादांबुजेभीरुःसर्वत्रभयवर्जितः सर्वदर्शीसर्ववक्तासर्वदुष्ट
निवारकः सर्वगुणान्वितोदिव्यःसोऽहंकिंबहुनावाक्यतः निर्भयोभय
सेवीचगुरुभक्तिपरायणः वाबालोवलवान्सिद्धःपंचतत्वेसदारतिः
महोत्साहोमहाबुद्धिर्महासाहसिकोपिच महाशयःसदादेविसा
धूनांपालनेरतः नमोभयःसदावीरोविनयेनमहोत्सकः एवंवा
ऽगुणैर्युक्तोवीरोरुद्रःस्वयंप्रिये पशून्शृणुमहादेविसर्वदेववहि
ष्कृतान् प्रथमान्पापविनांश्चपंचतत्वविनिंदकान् केचिद्ब्राह्मणोपा
नादेविकेचिन्मेषोपमाइव केचित्खरोपमाःश्रेष्ठाः केचिच्छूकरोप
माः श्वानाद्यापशवोदेविज्ञेयाऽज्ञानरायमाः एषांदेव्यार्चनंसिद्धिर्ग
णनेवाकृतोभवेत् अतोहिशवब्रह्मोघामेघाःस्वोघाश्चवीरकैः वर्जि
ताववर्जिताभद्रेपरमार्थवहिष्कृताः श्रीदेव्युवाच किंचित्तकथितं

कामा. ते. ८ 8

नाथसंदेहः प्रबलीकृतः तद्देहिपशुभावस्थगदितो यत्त्वं यं सदा श्रु
विंतं पशुभावेन वरं साधारणं वद देवनानैव जानाति तस्मात्सम
र्पितं नहि भेजं भेजाशु संदेहं करुणामात्र प्रभो सूर्यो यथा समाहेति
बोधकारेन नणादपि श्रीशिव उवाच भद्र शृणु त्वया विज्ञेतत्वं तच्छ्रु
एवं सकृते यउक्तापशुभावो हिकलौकस्तस्य पालकः पंचतत्त्वेन शू
न्नातितत्र निंदां करोति न शिवेन गदितं यत्तत्तस्य तामिति भावयन्
निंदायाः पातकं वेत्ति पशवः संप्रकीर्तिताः तस्माद्वारे वराम्याशु श्र
एवं शत्रुनाशकं हविष्यमत्रये नित्यं ताम्बूलं न स्पृशेदपि स्वस्त्री
ताविना नारी कामभावेन हि स्पृशेत् परस्त्रियं कामभावोद्वृष्टास्व
गं स्पृशन्त्यजेत् मत्स्यजे मांसमांसानि पशुर्वा नित्यमेव च गंधमाल्या
नि वस्त्राणि वीराणां त्रभजेनच देवालये सदा तिष्ठेदाहारार्थे रहं त्य
जेत् कन्यापुत्रादिवात्सल्यं कुर्यान्नित्यं समाकुलः ऐश्वर्यं प्रार्थयेत्त्रै
व यद्यलितत्व्यजेत् सदा दानं समाकुर्याद्यदि संनिधनानिव का
र्ये द्रोहान्तिपेसर्वान् हुंकारादिकांस्ततः विशेषेण महादेवि क्रोधं
संवर्जयेदपि कदाचिद्दीनयेनैव पाशवः परमेश्वरि सत्यं सत्यं पु
नः सत्यं नान्यथा वचनं मम श्रुत्वाद्यदि बालो भावमंत्रदानं करोति च
सत्यं सत्यं महादेवि देवी शापं प्रजायते इत्यादि बहुधाचाराः क्वचिद्भू
मः पशोर्मतिः तथापि वनमोक्षः स्यात्सिद्धिश्चैव कदाचन यदि वै

क्रमेणशाक्तःस्वेच्छयारमेत्सदानरः पश्वाचारंसदाकुर्यात्किंतस्यसिद्धि
र्नजायते जंबुद्वीपेकलौदेविब्राह्मणोहिकदाचन पशुर्नस्यान्न।
पशुर्नस्यात्पशुर्नस्याच्छिवाज्ञया नसंशयः इतिपाठांतरम् सत्येक
मेवतुर्वर्गैःक्षीराज्यमधुपिष्टकैः त्रैनार्घ्यंपूज्यतेदेवीक्षत्रेनसर्व
जातिभिः मधुभिःसर्ववर्णैश्चपूजयित्वापरेयुगे पूजनीयाकलौ
देवीकेवलैरासवैःशवैः नात्रकल्पःकलौदुर्गेनात्रकल्पकलौ
युगे नात्रकल्पोब्राह्मणानांशूद्रादीनांकलौयुगे नसंदेहोनसंदे
होनसंदेहःकलौयुगे सत्यमेतत्सत्यमेतत्सत्यमेतच्छिवोदि
ते सद्गुरोःशरणंनीत्वाकुलाचारंभजेन्नरः दिव्यत्वंलभतेकिं।
वावीरत्वंलभतेशुभे असाध्यंसाधयेद्देवियोध्यनायासतोयदुवि
वीरत्वंक्लेशतोदेविप्राप्नोतीहनचान्यथा पशुकल्पशतैर्वापि।
साधितंनचतत्तमः लंघितंनैवशक्नोतियथापंगुगिरिंकवि
न् अतिगुह्यमिदंप्रोक्तंरहस्यंतवसुंदरि गोपनीयंगोपनीयंगो
पनीयंसदानघे इतिश्रीकामाख्यातंत्रेदेवीश्वरसंवादेचतुर्थः
पटलः ४ श्रीदेव्युवाच कस्माद्देव्याःसाधकानांमकारानतनिदंने
महत् नकुर्वापंचतत्त्वैश्चपूजनंपरमेश्वर श्रीशिवउवाच क
लौतुसर्वशाक्तानांबालानांविशेषतः पंचतत्त्वविहीनानांनि
द्रंनंपरमेश्वरि तन्मध्येकालिकातारासाधकानांकुलेश्वरि

कामा.
तं.
९

मद्यं विना साधनं न च महाहास्याय कल्पते यथा दीक्षां विना देवि साधनं
हास्यमेव हि तथानयोः साधकानां ज्ञेयं तत्त्वविना सदा शिलायां श
स्यवापेष्वन भवेदंकरो यथा अनाहूय्यात्तितो देवि कर्षणं च यथा न
हि अक्षतं विना कृतो देवि कृतो फलं प्रजायते गमनं च विना कापि स्या
मद्याग्निर्यथा न च अतो देवाः साधने शुद्धं पंचतत्त्वं सदा लभेत् पंचतत्त्वैः
साधकैर्ज्ञानं चैव ये हि विना सदा मद्यैर्मांसैर्मत्स्यायन्त्या शुद्धाभिर्मैथुने
रपि स्त्रीभिः सार्द्धं सदा साधकस्त्रैये जगदंबिका अन्यथा च महानिंदा
गीयते पण्डितैः स्वैरः कायेन मनसा वाचा तस्मात्तत्परो भवेत् कालि
कातारिणी दीक्षां शक्तिसामध्ये लेहनं न करोति नरो यस्तु सकलो पति
तो भवेत् वैदिकी तांत्रिकी संध्यां जपेद्धोमं वहिष्कृतः आब्रह्मणः सप
वो कामसपवहेति मूर्खकः प्यूनी शुद्धं समं तस्य तर्पणं यस्मिल्ल्भावपि न
तो न तर्पयेत्सोपि यदि ब्रह्मदात्मनो हितं कालीतारामंत्रे शाक्ती वा
रं करोति नः शूद्रं वैत तत्कुरीरे तत्प्राप्ते नेनन वामथा तत्रियोपि तथा देवि
वैश्यश्चांडालतां व्रजेत् शूद्रो हि सकरं न व याति या तिन संशयः अव
श्यं ब्राह्मणो निमंसराजा वैश्यश्च शूद्रकः पंचतत्त्वैर्भजेद् देवी न कृयोत्स
शायं कवित् पंचतत्त्वैकलौ देवि पूजयेद्यः कलेश्वरी तस्य साध्यं त्रिभु
वने न किंचिदपि विद्यते सर्वाल्लणो वैस्तवः सशाक्तो गाणपतोपि च
सौरः सपरमार्थी वसपव शांतिदीक्षितः सपव धार्मिकः साधुर्ज्ञानी

वैवमहाकृती याज्ञिकः सर्वकर्माहः सोहि देवो न चान्यथा पावना
नीह तीर्थानि सर्वेषामिति संमतं तीर्थानां पावनः कौलो गिरिजेव
कं किंवचः अस्यैव जननी धन्या धन्या हि जनकादयः धन्यास्तातिकुटुं
बं च धन्या आलापिनो जनाः नृत्यंति पितरः सर्वे गाथां गायंति ते सदा
अपि कश्चित्कुलेस्माकं कुलज्ञानी भविष्यति तदा योगं प्रभविष्यामः
कुलीनानां सभातले समागन्तमिति ज्ञात्वा स्वर्लस्वकाः पितरः परे कु
लाचारस्य माहात्म्यं किं ब्रूमः पारमेश्वरि पंचवक्त्रेण देवेशि सनातनम्ः
फलानि च श्रीदेव्युवाच साधनं वद कौलेश साधकानां सुखावहं
दिव्यं रम्यं मनोहारि सर्वाभीष्टफलप्रदं श्रीशिव उवाच शृणु कामक
लाकांते साधनं नम सुखावहं यत्किंचिद्दर्दितं सर्वं विस्तृतं तव हृदास्पदे
अतिसललितदिव्यं स्थानमालोक्य मन्याहृदि च परमदेवीं संवि।
भावैकचित्तः मधुरकुसुमगंधैर्वासमानां समंतादुपरि विलसति
हेसाधनार्थी कुलज्ञः जपवति यतमानः शास्त्रबुद्धिं त्यक्त्वा पेतन्सखल
कारकवीजान्यत्र दुर्गे ततो हि विरमवचक पश्चांवर्जयित्वा चेयित्वा
यदि जपति विधिज्ञस्तत्क्षणात्सोप्यहं च उपवनपरिशुद्धे सुन्दरम्या
लये यो विधिकृतवरलिंगे लेपयित्वा सुगंधैः विविधकुसुममर्द्यैरर्थ्यं
पयित्वानन्तां संप्रति जपति सुभक्त्या वल्लितो जायते सः परिचरतिच
साधुः सिद्धिवर्गः स शंकः परनवभुलतानां वक्रपद्मोपभोगी जयति सु

कामा. तं. १० वनमध्येनिर्जनस्थानेसोपि व्रजतितन्मन्त्रंनित्यंसार्वभौमोनृणांसः
अभिनवशुभमीरैःकंपमप्रकीर्णैर्विविधकमलगंधव्याप्तमीनप्रसू
के अपरविहितवल्लयामसीशेषवीपिविगतजनसमूहेप्राप्यदे
विग्रकोणे घनजनितसुशोभेविद्युदादीप्तिरम्येहृदिचपरमदेवी
चिंतयित्वास्वभक्त्या विधिविहितविधानैःस्नानपूजांसमाप्यप्रति
जपतिनिशायांगह्वरेवस्तकःस्यात् इहवरफलवराणांप्राप्यशीर्षेनि
धायतत्पिमजतिजलतोभावमदाकलेशि स्मरगुरुविरहकोवाको
पिचेद्द्वादिनेशीव्रजतिभुवनमध्येदिक्पातितेवकोपि इतिचपरमदे
व्याःसाधनेयत्नयोक्तंयदिपठतिसुभक्त्यागह्वरेवासनाभिः अभिम
तफलसिद्धिःसर्वलोकैर्वरेण्योभवतिभुवनमध्येशुभ्रदारैर्यतोपि
अचलधनसमूहःसर्वभोगेर्वसेन्नप्रतिदिनमभिपूजादेवतायाश्च
हेव परिजनगणशक्तिःसर्वदातत्रतिष्ठन्सदासिवसतिराज्ञःसाद
रःसोपिवंद्यः इतिश्रीकामाख्यातंत्रेपार्वतीश्वरसंवादेपंचमःपट
लः ५ श्रीदेव्युवाच श्रुतंरहस्यंदेवशिकामाख्यायामहेश्वर नदेश
तुविनाशायसाधनंकिंवदप्रभो श्रीशिवउवाच शृणुगुह्यतरंदेवि
तवस्नेहाद्धितप्रते महावीरःसाधकेंद्रःप्रयोगंतुसमाचरेत् एत
द्विनामहादेवींपंचतत्त्वेनसाधयेत् महानंदमयोभूत्वासाधयेत्साध
नेमहत् सुमूर्त्तंतत्समारायकूर्चबीजेनशोधयेत् तर्पयेद्देवींवारां

सकलंवापिवित्तस्वयं दशादिह्नमहापीठेप्रतिपेदानयेप्रिय नग्नोभू
त्वारमेत्तत्रशत्रुनाशोभवेद्ध्रुवं शुक्रशोणितमूत्रेणवीरोयदिहणी
भवेत् भैरवीरूपिनातस्यमंत्रंसत्यंवदाम्यहं दृष्ट्वाश्रुत्वामहेशानि
निंदांकरोतियोनरः सहस्रानरकंयातियावच्चंद्रदिवाकरौ वीरावारं
महेशानिननिंदेन्मनसापिच वीरोयस्तुमहादेवी स्वेच्छाचारीसदा
शुचिः मंत्रपात्रंतमादायसाधनामलिखेच्छिवे वाग्नाहरितंकृत्वा
स्वमूत्रेणतत्रनिक्षिपेत् मायाबीजंमहेशानिअष्टोत्तरशतंजपेत् भैरवै
दर्शयेदेविमारणोच्चाटनंभवेत् स्वमूत्रंचसमादायवामहस्तेनशंक
रि शोधितांभैरवीगात्रेनिःक्षिपेत्साधकोत्तमः उन्मादोजायतेशत्रुश्चि
यतेवामहेश्वरि मोहितःक्षोभितोवापिवश्योवापिभवेद्ध्रुवं मूत्रसा
धनमात्रेणसहस्रान्तमंगरिपुं नाशयेत्साधकोवीरोनात्रकार्याविचा
रणा श्रीदेव्युवाच शुक्रशोणितमूत्राणिशुद्धानीहकथंप्रभो श्रीशिव
उवाच शृणुदेविरहस्यंचमहात्म्यंवदाम्यहं शुक्रोहंशोणितस्त्वंहि
द्वयोरेवाखिलंजगत् शुद्धंसर्वशरीरंतुशुक्रशोणितजंततः एवंभू
तशरीरेतुयद्वहन्तंप्रजायते शुद्धंतत्कथंदेविपामरोनिंदतिप्र
वं ब्रह्मज्ञानमिदंदेविमयातेगदितंकिल पुनःशुद्धंजगत्सर्वंसका
यस्यैतत्कथा ब्रह्मज्ञानंविनादेविनचमोक्षःप्रजायते ब्रह्मज्ञानी
शिवःसाक्षाद्धिसर्वब्रह्मावपार्वति शरीरादीनितःशुद्धोब्रह्मलक्षणेव।

कामा
तं०
११

दपारगः क्रोडीनस्यवमंतोहं सर्वतीर्थानि निश्चितं इति श्रीकामा
ख्यातंत्रे पार्वतीश्वरसंवादे षष्ठः पटलः ६ श्रीदेव्युवाच महादेव
जगन्नाथ लोककरुणासागर प्रभो पूर्णाभिषेकं कौलानां वद मे सुविस्ता
रं श्रीशिवउवाच शृणु देवि महाप्राणवल्लभे परमाद्भुतं पूर्णाभिषे ग्री
कं सर्वाशापूरकं शिवताप्रदं आगमसत्कुलः सिद्धो मंत्रतंत्रविशारद
कौलः सर्वजनख्यातः अभिषेकविधिं चरेत् आनीयमालये शुद्धे रम्ये
कौलिकसंमते वेश्यांगनागृहानीयतत्त्वानिचमस्ययत्नतः विशिष्ट।
कौलिकान्भक्त्यानत्रैवसन्निवेशयेत् अर्चयेदभिषेकार्थं गुरुं वस्त्रा
दिभूषणैः प्रणमेद्धि पिवद्भक्त्यातोषयेन्नतिवाक्यतः प्रार्थयेत्कु
द्धभावेन कुलधर्मवदेतिच कृतार्थं कुरु मां नाथ श्रीगुरो करुणा।
निधे अभिषिंच साधकं च मेवार्थं शरणागतं ततोभिषिक्तान्त्वानि
शोधयेत्कुल्लिकामात्रुद्रा स्थापयित्वा पुरः ॐ मंमंत्रशुद्धादिभिः प्रिये वि
तानैर्धूपदीपानां कृत्वा चामोदितं स्थले नानापुष्पैः स्वगंधैः सर्वोप
करणैर्यजेत् समाप्य महतीं पूजां तत्त्वानि सन्निवेदयेत् प्रादौ सत्त्वे भवः स
मर्प्य च प्रसादात्संभजेत्ततः शुभवक्रं विनिर्माय आगमोक्तविधान
तः अभिषिक्तासाधकांच पाययेत्स्वयं पिबेत् भुंजीरन्भक्तसंघा।
साधैश्चर्व्यचोष्यादिभिस्ततः रमेरन्परमानंदैर्वेश्यायांवयथासुखं
चरेयुः कर्मकर्तृत्वसिद्धिर्भवति निश्चला अभिषेकेन कर्माणु निर्वि

ग्रंथेतिनिश्चितं वक्रालयात्रिःसरेत्रॅप्रकोपिशंकरि प्रातःकृत्यादि
कर्माणिकुर्यान्नैवसाधकः दिनानिशीणिसंख्याप्यभक्त्यास्नात्रसम
र्पयेत् शिष्यश्चापिदिवारात्रमभिषिक्तोभवेत्ततः पुत्रस्थानविधिंव
देस्मादरंशृणुपार्वति नप्रकोडेनहित्वंद्रप्रमाणंघटमाहरेत् ताम्रे
णनिर्मितंवापिस्वर्णेननिर्मितंचवा प्रवालहीरकंमुक्तास्वर्णंरूपेत
थैवच नानालंकारवस्त्राणिनानाद्रव्याणिभूरिशः कस्तूरीकुंकुमादी
निनानागंधानिवाहरेत् नानापुष्पाणिवीरणिपंचतत्वानियत्नतः
विहितान्सपदीपांश्चधूतेनपरमेश्वरि ततःशिष्यंसमानीयगुरुःपु
ष्पालयेप्रिये वेश्याभिःसाधकैःसार्द्धस्वजनैश्चसमावरेत् पटलोक्त।
विधानेनभक्तितःपरिसृजयेत् स्नानसमाप्यदेव्यास्तुसर्वसत्वप्रण
मेन्मुदा ततोहिशिवशक्तिभ्योगंधमाल्यानिदापयेत् आसनंवस्त्र
भूषाश्चप्रत्येकेनकुलेश्वरि ततःशंखादिवाद्यैश्चमंगलाचारणैःपरैः
घटस्थापनंकुर्यात्कमंतत्रशृणुप्रिये कामबीजेनसंप्रोक्ष्यवाग्भ
वेनैवशोधयेत् शक्ताकलसमारोप्यमायया पूरयेज्जलैः प्रवाला।
दीनिवरत्नानिन्यसेत्तत्रयत्नतः आवाहयेच्चतीर्थानिमंत्रेणानेन
देशिकः ओंगंगाद्याःसरितःसर्वाःसमुद्राश्चसरांसिच सर्वेसमुद्राःस
रितःसरांसिजलदानदाः ह्रदाःप्रस्रवणाःपुण्याःस्वर्गपातालभूग
ताः सर्वतीर्थानिपुण्यानिघटेकुर्वंतुसन्निधिं रमाबीजेनजप्तेन।

कामा
तं.
१२

पल्लवं प्रतिपादयेत् कूर्चेन फलदानं स्यात् हूं यवव्रीहियात्मना लल
नयैव सिंहं पुष्पं दद्यात्कामतः मूलेन हूं वां प्रणवे कूर्चोदयुक्त
एं ततः हूं फट् स्वाहेति मंत्रेण कुर्याद्दर्भैश्च ताडनं विधिवन्मूलपीठं
ततस्तं संयोज्य पूजयेत् स्वतंत्रोक्तविधानेन प्रार्थयेदमुनाद्यैः न
हृदे हस्तमारोप्य शिष्यं पुरपत्रुरुक्ष्मसः उत्तिष्ठ ब्रह्मकलस देवता
भीष्टदायक सर्वतीर्थोदकैः पूर्णैः पूरयास्मन्मनोरथं अभिषिंचे
द्गुरुः शिष्यं ततो मंत्रैश्च पार्वति मंगलैर्निखिलैर्देवैः साधकैः शक्ति
भिः सह पल्लवैराम्रकाद्यैश्च नतिमच्छिष्यमेव च आनंदैः परमेशा-
नि भक्तानां हितकारिणी इत्यागमूर्तिऋषिरनुष्टुप्छंदः शक्ति
देवता सर्वसंकल्पसिद्धये विनियोगः ॐ राजराजेश्वरी शक्तिभैर
वी कालभैरवी श्मशानभैरवी देवी त्रिपुरानंदभैरवी त्रिकूटा त्रिपु
टा देवी तथा त्रिपुरसुंदरी त्रिपुरेशी महादेवी तथा त्रिपुरमालिका
त्रिपुरानंदिनी देवी तथैव त्रिपुराननी एतास्त्वामभिषिंचंतु मंत्रपूते
न वारिणा छिन्नमस्ता महादेवी तथैवैकजटेश्वरी तारा च नव दुर्गा
च शूलिनी भुवनेश्वरी त्वरिताख्या महादेवी तथैव च त्रिखंडिका नि
त्या च नित्यस्नपा च वज्रप्रस्तारिणी तथा एतास्त्वामभिषिंचंतु मंत्रपू
तेन वारिणा अश्वारूढा महेशानि तथा महिषमर्दिनी दुर्गा च नव
दुर्गा च श्रीदुर्गा भगमालिनी तथा भगंदरी देवी भगक्लिन्ना तथा परा

12

सर्वचक्रेश्वरीदेवीतथानीलसरस्वती सर्वसिद्धिकरीदेवीसि।
द्धगंधर्वसेविता उग्रतारामहादेवीतथाचभद्रकालिका एता।
स्त्वामभिषिंचंतुमंत्रपूतेनवारिणा क्षेमंकरीमहामायावाणि
रुद्रसरस्वती मातंगिनीचान्नपूर्णाराजराजेश्वरीतथा एतास्त्वा
मभिषिंचंतुमंत्रपूतेनवारिणा उग्रचंडाप्रचंडाचचंडोग्राचंडना
यिका चंडाचंडवतीचैवचंडरूपातिचंडिका एतास्त्वामभिषिंचं
तुमंत्रपूतेनवारिणा उग्रदंष्ट्रामहादंष्ट्राशुभदंष्ट्राकपालिनी भी
मनेत्राविशालाक्षीमंगलाविजयाजया एतास्त्वामभिषिंचंतुमं
त्रपूतेनवारिणा मंगलानंदिनीभद्रालक्ष्मीःकीर्तिर्यशस्विनी
पुष्टिर्मेधाशिवासाध्वीयशशोभाजयाधृतिः श्रीनंदाचसुनंदा
चमंदिनीनंदपूजिता एतास्त्वामभिषिंचंतुमंत्रपूतेनवारिणा
विजयामंगलाभद्राधृतिःशांतिःशिवाक्षमा सिद्धिस्तुष्टिरुमा
पुष्टिःश्रीरतिर्द्धिर्धृतिस्तथा दीप्ताकांतिर्यशोलक्ष्मीरीश्वरीबुद्धि
रेवच चक्रीजयावतीब्राह्मीजयंतीचापराजिता अजितामान
वीश्वेतादितिश्चादितिरेवच मायाचैवमहामायामोहिनीक्षो।
भिणीतथा कमलाविमलागौरीशरण्यंबुधिसुंदरी दुर्गाचि
चारुंधतीचघंटकर्णीकपालिनी रौद्रीकालीचमाहेश्वरीत्रिनेत्रा
चापराजिता सुरूपाबहुरूपाचतथैवविश्वरूपिका चर्चिकाच।

पराह्नेयास्तथैवब्रह्माणीजिता वैष्णवीचकौमारीतथामाहेश्वरीपरा
वैसवीचमहालक्ष्मीःकार्त्तिकीकौशिकीतथा शिवदूतीचचामुंडा
मुंडमालाविभूषिता एतास्त्वामभिषिंचंतुमंत्रपूतेनवारिणा इंद्रो
ग्निर्यमश्चैवनिर्ऋतिर्वरुणस्तथा पवनोधनदेशानौब्रह्मानंतौ।
दिगीश्वराः एतास्त्वामभिषिंचंतुमंत्रपूतेनवारिणा संवत्सरश्चाय
नौचमासाःपक्षौदिनानिच तिथयस्त्वाभिषिंचंतुमंत्रपूतेनवारि
णा रविःसोमःकुजःसौम्योगुरुःशुक्रःशनैश्चरः राहुःकेतुश्चसत
तंत्वाभिषिंचंतुतेग्रहाः नक्षत्रंकरणंयोगाःव्रतेसिद्धिस्ततःपरं द
ग्धपापंतथाभद्रायोगावारास्तथा वारवेलाकालवेलादंड
राहपादयस्तथा अभिषिंचंतुसततंमंत्रपूतेनवारिणा असितांगो
रुरुश्चंडःक्रोधउन्मत्तसंतकः कपालीभीषणश्चसंहारोष्टौच
भैरवाः अभिषिंचंतुसततंमंत्रपूतेनवारिणा डाकिनीपुत्रकाश्चै
वराकिणीपुत्रकास्तथा लाकिनीपुत्रकाश्चापि काकिनीपुत्रिकाप
रे शाकिनीपुत्रकाश्चैवहाकिनीपुत्रकास्तथा ततश्चयक्षिणीपु
त्रादेवीपुत्रास्ततःपरं मातृणांचतथापुत्राःऊर्द्ध्वमुखास्तताश्चैव अ
धोमुखाःस्तताश्चैवउन्मुखाश्चस्तथापरे अभिषिंचंतुतेसर्वेमंत्र
पूतेनवारिणा ब्रह्माविष्णुश्चरुद्रश्चईश्वरश्चसदाशिवः पंचैतास्त्वाम
भिषिंचंतुमंत्रपूतेनवारिणा पुरुषःप्रकृतिश्चैवविकाराश्चैवषो

उश आत्मांतरात्मापरमात्मानात्मानः प्रकीर्तिताः आत्मनश्चगुणा।
श्चैवसकलाः सकलाश्चयेपरे एतेत्वामभिषिंचंतुमंत्रपूतेन वारिणा
वेदादिबीजंऊंबीजंक्लींबीजंमीनकेतनं शक्तिबीजंरमाबीजंमाया
बीजंसुधाकरं चिंतामणिमहाबीजंनारसिंहंक्षेत्रकरं मार्तंडभैरवं
दौर्गंबीजंश्रीगुरुबीजंमं गाणपंसंववाराहंकालीबीजंभयापहं
एतानित्वाभिषिंचंतुमंत्रपूतेनवारिणा गंगागोदावरीरेवायमुना
चसरस्वती आत्रेयीभारतीचैवसरयूर्गंडकीतथा करतोयाचंद्रभा
गाश्वेतगंगाचकौशिका भोगवतीचपातालेस्वर्गेमंदाकिनीतथा
एतास्त्वामभिषिंचंतुमंत्रपूतेनवारिणा यानिकानिचतीर्थानि।
पुण्यान्यायतनानिच तानित्वामभिषिंचंतुमंत्रपूतेनवारिणा म
तिश्चवल्लभावन्हेर्वषट्कृच्चेमनःपरं वौषट्कारंतुफट्कारमभि
षिंचंतुसर्वदा जंबूद्वीपादयोद्वीपाःसागरालवणादयः अनेना
द्यास्तथानागाःसर्पायेतक्षकादयः एतेत्वामभिषिंचंतुमंत्रपूते
नवारिणा नश्यंतुप्रेतकूष्मांडग्रहास्सादानवाश्चये पिशाचाश्चगुह्य
काभूताअभिषेकेनताडिताः अलक्ष्मीःकालकर्णीचपापानिच
महांतिच नश्यंतुत्वाभिषेकेनतारबीजेनताडिताः रोगाश्शोका।
श्चदारिद्र्यंदौर्बल्यंचित्तविक्रिया नश्यंतुत्वाभिषेकेनवाग्बीजेनेव
ताडिता लोकानुरागत्यागश्चदौर्भाग्यमपिदुर्यशाः नश्यंतुत्वाभिषे

कामा. केणामन्मथेनैव ताडिताः तेजस्तामोबलस्तामो बुद्धिस्तामस्तथैव
तं. च नश्यन्त्वाभिषेकेण शक्तिबीजेन ताडिताः विषापमृत्युरोगाश्च
१४ डाकिन्यादिभयं तथा घोराभिचाराः क्रूराश्च ग्रहानागास्तथापरे न
श्यन्त्वाभिषेकेन कालीबीजेन ताडिताः नश्यन्तु विपदः सर्वाः सं
पदः सन्तु सुस्थिराः अभिषेकेण शाक्तेन पूर्णाः सन्तु मनोरथाः
ततो देवीं गुरुं चैव प्रणमेत्कृपया गुरुः दक्षिणां गुरवे दद्यात्स्वर्णकां
चनमानतः नानावस्त्रैरलंकारैर्गन्धमाल्यादिभिस्तथा तोषयेत्त
त्रिवारैश्च प्रणमेत्पुनरेव हि कायेन मनसा वाचा गुरुः कुर्यात्।
च्चाशिषः वात्सल्यैर्विविधैः शिष्यं ग्राहयेत्तन्त्रमुत्तमं गुरुस्तु भैर
वैः सार्द्धं शक्तिभिर्विहरेत्तदा भैरवाः शक्तयश्चापि कुर्युराशीस्त
यत्नतः तथा त्रिदिवसं चात्र भोजयेद्भैरवान्बहून् अष्टमे दिवसे शि
ष्यः पुनः कुर्यात्समेवं तं ताम्रपात्रोदकैर्देवि विविधं रात्रौ जपन्सुधीः
कुंडकं च तथा सम्यक् संप्रतिदेहत्तदेवि प्रिये शक्तिभ्यो भैरवेभ्यो पि त
तो वस्त्रादिभूषणं दद्यात्प्रयत्नतः साधुविधिर्देवि समापने श्री
देव्युवाच श्रुतं रहस्यं देवेशाभिषेचनकर्मणि गुरुः कौलाधि
कारी स्यात् तत्त्वं मे वद प्रभो श्रीशिव उवाच महाज्ञानी कौलिकेन्द्रः
शुद्धो गुरुपरायणः निग्रहानुग्रहे शक्तः शिष्यपालनतत्परः पु
त्रदारादिभिर्युक्तः सज्जनस्तत्त्वदर्शिनाः श्रद्धावानागमे नित्यं सो

14

यिकर्त्तानचान्यथा ग्रंथंएवंज्ञेनतथाहंग्रंस्वल्पज्ञानप्युतंपुनः स्वा
मान्यकौलेश्वरदेवर्जयेन्मतिमान्सदा उदासीनंविशेषेणवर्जये
त्सिद्धिकामुकः उदासीनमुखाद्दीक्षांवध्वानारीयथाप्रिये अज्ञा
नाद्यदिवामोहाडुदासीनंतुयामरः अभिषिक्तोभवेद्देविविघ्न
स्तस्यपदेपदे किंतस्यजपपूजाभिः किंध्यानैः किंचभक्तितः
सर्वंहिविफलंतस्यनरकंयातिबांतिमे कल्पकोटिशतैर्देवि
भुंक्तेसनरकंसदा ततोहिवहुजन्मभ्योदेवीमंत्रमवाप्नुयात्
ततोहिविहितेशुद्धंरहस्यंगुरुमालभेत् अभिषेचनकमाणि
पुनःकुर्यात्प्रयत्नतः सफलंहिसदाकर्मसर्वंतस्यभवेद्ध्रुवं
विद्यापिजननीतल्यापालितंसततंप्रिये यथापशुंपरित्यज्य
कौलिकंगुरुमालभेत् उदासीनंपरित्यज्यतथाभिषेचनंशते
अभिषिक्तःशिवःसाक्षादभिषिक्तोहिदीक्षितः सएवब्राह्म
णोयस्मादेवीदेवपरायणः तस्यैवसफलंजन्मयरएंपाष्टएउ
पार्वति तस्यैवसफलंकर्मतस्यैवसफलंधनं तस्यैवसफलो
धर्मःकामश्चसफलोमतः दीक्षाहिसफलादेविक्रियाश्चस
फलास्तथा सर्वंहिसफलंतस्यगिरिजेवक्रुकिंवचः यत्रदेशेव
सेत्साधुःसोपिवाराणसीसमः तस्यक्रोडेवसंतीहसर्वतीर्था
निनिश्चितं सत्यंसत्यंमहामायेपुनःसत्यंमयोदितं उक्तानिया

कामा
तं.
१५

निषानीह सेवनानि च पार्वति सर्वतंत्रेषु नामसकलानां हि तेषो
त्तमो योगं गुरुं तथा शिष्यं विनैतत्पटलेन हि जायते देवदेवेशि म
त्समं मम योदितं इदं तत्सेवनं देवि त्रिषु लोकेषु दुर्लभं गणेशः पा
त्रमत्रैव कार्तिकेयोपि पार्वति ममतत्स्नोप्रयत्नतत्स्नो विसत्त्वस्यात्र
भाजनं पंचवक्त्रैश्च शक्तो न वर्णितं परमेश्वरि इति ते कथितं शुभं
सेवनं परमं महत् गोपनीयं गोपनीयं गोपनीयं प्रयत्नतः यथार
तिर्गोपनीया न तथाभिषेवनं परं निर्वाते पनमागतं गोपयेत्तु यथा
परं तथैव तन्महामाये गोपनीयं ममाज्ञया इति श्रीकामाख्यातंत्रे
पार्वतीश्वरसंवादे सप्तमः पटलः ७ श्रीदेव्युवाच भक्तितन्त्रं महा
देव वद मे करुणानिधे यस्मिन् षड्दर्शनानीह वोपहास्यगतानि
च श्रीशिव उवाच शृणु देवि प्रवक्षे यत्त्वं हेतन तन्मम यत्नन्म
मे वद देवेशि ग्रहं वेश्मनि तथा हरिः मोदकेन यथा लोकः प्रतारय
ति बालकान् लगुडेन यथा देवि वभाति दुर्जनेः शिव तथानंगीकृ
ता लोके दर्शने वैर्वरोमया दुर्जनेय दिशुक्तिः स्यान्निकयेति शुभा
नने षड्दर्शनमहाकूपे पतिताः पशवः प्रिये परमार्थं न जानंति
दर्वीपाकरसं यथा न सारः कदलीवृक्षे नैरंडे तत्शुभानने दर्शने
तु तथा मुक्तिर्नास्ति देवि मयोदितं यथा मरीचिकायां तु निर्वे
दितेषु नरश्च गाः दर्शने ष्योनिवर्तंते तथा मुक्तवः पुनः श्रीगुरु

15

स्वप्रसादेनमुक्तिमार्गोसदालभेत् विचरेत्सर्वशास्त्रेषुकौलकाय
ततःस्वधीः मुक्तितत्त्वप्रवक्ष्यामिप्रसादंश्रृणुपार्वति शरीरधारणं
यस्माकुर्वंतीहशनैःशनैः प्रादावश्यग्रहोदेव्याःश्रीगुरोस्तदनंतरं
तदाननात्ततोदीर्घाभक्तिस्तस्याःप्रजायते ततोहिसाधनंशुद्धंत
त्साज्ञानंसुनिर्मलं ज्ञानान्मोक्षोभवेत्सत्यंइतिशास्त्रस्यनिर्णयः
मुक्तिश्चतुर्विधाप्रोक्तासालोक्यंतत्प्रमाननेसारोप्यंसहयोज्यंच
निर्वाणंहिपरात्परं सालोक्यंवसतेर्लोकेसारोप्यंतत्स्वरूपतः सा
योज्यंकलयायुक्तंनिर्वाणंतुमनोलयः श्रीदेव्युवाच सम्यक्कल
योजनस्यैवनिर्वाणंयत्तुकथ्यते तत्किंवदमहादेवसंशयंलय
स्यात्कुरु श्रीशिवउवाच अकिंलयात्मिकामुक्तिः स्मरणांदया
निधे दुर्लभत्वाह्यपिनाक्रीडयाभिस्मरानहे मनोलयात्मि।
कामुक्तिरितिज्ञानीहिशंकरि ब्रह्मामायाविस्नाचसलणा।
नारदादिभिः सालोकेकेवलंयत्तुयातिसारोप्यमुक्तकहयं त्रिधा
सायोज्यवानेतिनिर्वाणीसर्वमेवहि नीलोत्पलदलश्यामामु
किहिंरलवर्तिनी मुक्तस्यैवसदासक्तानास्फुरत्नविरतांप्रिये
सनातनीजगद्वंद्यासच्चिदानंदरूपिणी परावजननीचैवसर्वा
भीष्टप्रदायिनी इष्टेनिश्चलसंवेधंनिर्वाणमुक्तिरीदृशी मुक्ति
ज्ञानंकुलज्ञानंनान्यज्ञानंकुलेश्वरि तथाचसाधनंतेषंपंचत।

कामा
तं०
१९

16

वैष्णवस्तुकिदः अनुग्रहस्तदेव्यायःकुलमार्गप्रदर्शकः दीक्षाकुला
त्मिकादेविश्रीगुरुर्मुकपंकजात् कुलद्रव्येषुयाभक्तिःसामोक्षदा
यिनीमता ज्ञानाविवेशयत्नेनकुलतत्वानंभजेत्सुधः यदिभाग्यव
शाद्देविमंत्रमेतन्नलभ्यते गुरोश्चकारणात्तस्माःस्वयंज्ञातेनवा
न्यथा अश्रुतंश्रुतकितत्वंहिकथितंतेमहेश्वरि आत्मयोनिर्यथा
देवितथागोप्यंममात्तया इतिश्रीकामाख्यातंत्रेपार्वतीश्वरसंवा
देसप्तमःपटलः ८ श्रीदेव्युवाच कामाख्यायामहादेवकथिता
सर्वरूपिणी साकारदजगद्धात्र्येकपदंमाकुरुप्रभो कथयित्वक
पदंनाथयदिमेशापयस्यपि इतीकाकामिनीयोनिंसम्यक्सं
दर्शयेन्मतिं श्रुत्वैतद्गिरिजावाक्यंप्रहस्योवाचशंकर श्रीशिवउ
वाच शृणुदेविममप्राणवल्लभेकथयामिते योदेवीकालिका
माता सर्वविद्यास्वरूपिणी कामाख्यासैवविख्याता सत्यंसत्यनवा
न्यथा सैवब्रह्मेतिजानीहिसंतार्थंदर्शनानिच विचारंतिमत्स्व
कानियथाचेद्धिरानन: अस्याहिजायतेसर्वंजगदेतच्चराचरं
लीयंतेपुनरस्यांवसंदेहंमांकुरुप्रिये स्थूलासूक्ष्मापरादेवीस
च्चिदानंदरूपिणी अमेयविक्रमपणामाकरुणासागरामता सु
क्तिमयीजगद्धात्रीसदानंदमयीतथा विश्वंभरीक्रियाशक्तिस्ता
रावैवसनातनी यथाकर्मसमामोवदत्तिपणाफलसिद्धिदा तथा

भुक्तिरसौ देवि सर्वेषां फलदायिनी अतो हि दक्षिणा काली कथ्य
ते वरवर्णिनी कृष्णवर्णा सदा काली आगमस्येति निर्णयः उक्ता
नि सर्वतंत्राणि तंत्रेणानेन निश्चितं कृत्वा संकल्पसिद्धौ तत्कामे
भ्य पाठयेद्बुधः पठित्वा श्रावयेद्वापि शृणोति पूजयेद्यदि तं तं का
मम वाप्नोति श्रीमत्काली प्रसादतः यथा स्पर्शमणिर्देवि तथै
तं तंत्रं च सत्तमं यथा कल्पतरुर्दाता तथा ज्ञेयं मनीषिभिः यथा
सर्वाणि रत्नानि सागरे संति निश्चितं तथा च सिद्धयः सर्वा भुक्ति
मुक्तिर्वरानने सर्वदेवाश्रयो मेरुर्यथा सिद्धं तथा श्रुनः सर्ववि
द्यायुतं तंत्रं शपथेन वदाम्यहं यस्य गेहे स्थितं देवि तंत्रमेतद्
यायहे रोगशोकपातकानां लेशो नास्ति कदाचन तत्र दस्युभ
यं नास्ति ग्रहराजभयं न च कूष्माण्डानां भयं नैव व्याघ्रादीनां भयं
न च वैनायकानां सर्वेषां गन्धर्वाणां तथा न च स्वर्गे मर्त्ये च पाता
ले ये ये संति भयानकाः हिंसाविघ्नकराश्चैव नैतेषां भयमीश्व
रि यमदूताः पलायंते विमुखा भयविह्वलाः सत्यं सत्यं महादे
वि शपथेन वदाम्यहं संपत्तिरत्नलाभश्च तिष्ठंति सासपौत्रकम्
वाणी तथैव देव्यास्तु प्रसादाद्बलश्रिनः एतत्ते कथितं देवि न
प्रकाश्यं कदाचन गोपनीयं गोपनीयं गोपनीयं सदा प्रिये पशो
रग्रे विशेषेण गोपनीयं प्रयत्नतः श्रेष्ठानां साधकानां च सान्निध्ये

कामा॰
तं॰
१८

नवदेदपि नदद्याज्ज्ञानखंजेभ्योविगीतेभ्यस्तथैवच उदासीनज
नस्यैवसान्निध्येनवदेदपि दांभिकायनदातव्यमभक्तायविशे
षतः मूर्खायभाववहीनायदरिद्रायममाज्ञया दद्याच्छांतायशु
द्धायकौलिकायमहेश्वरि कालीभक्तायशैवायवैस्नवायशि
वात्मया श्रद्धेतभावयुक्तायमहाकालप्रजापिने सुरासीवंद
कायापिशिवाबलिप्रदायच इतिश्रीकामाख्यातंत्रेपार्वतीश्व
रसंवादेनवमः पटलः समाप्तः ॥

१७

